# Shringarashatak by Bhartrihari

# શ઼ૃંગારશતકં ભર્તૃહરિવિરચિતમ્

## Document Information

```
Text title : bhartRiharivirachita shRiNgArashataka
File name : shringar.itx
Category : shataka, major_works, bhartrihari
Location : doc_z_misc_major_works
Description-comments : Bhartrihari@s three hundred-verse sets
Latest update : May 30, 1999
Send corrections to : sanskrit at cheerful dot c om
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 24, 2024

*sanskritdocuments.org*

# શ્ૃંગારશતકં ભર્તૃહરિવિરચિતમ્

॥ શ્રી ॥

વસંતતિલકા

શમ્ભુઃ સ્વયમ્ભુહરયો હરિણેક્ષણાનાં
યેનાક્રિયન્ત સતતં ગૃહકર્મદાસાઃ ॥

વાચામગોચરચરિત્રવિચિત્રિતાય
તસ્મૈ નમો ભગવતે કુસુમાયુધાય ॥ ૧॥

શિખરિણી

ક્વચિત્સુભ્રૂભઙ્ગૈઃ ક્વચિદપિ ચ લજ્જાપરિણતૈઃ
ક્વચિદ્ ભીતિત્રસ્તૈઃ ક્વચિદપિ ચ લીલાવિલસિતૈઃ ॥

કુમારીણામેભિર્વદનકમલૈર્નેત્રચલિતૈઃ
સ્ફુરન્નીલાબ્જાનાં પ્રકરપરિપૂર્ણા ઇવ દિશઃ ॥ ૨॥

અનુષ્ટુભ્

મુગ્ધે! ધાનુષ્કતા કેયમપૂર્વા ત્વયિ દૃશ્યતે ।
યયા વિધ્યસિ ચેતાંસિ ગુણૈરેવ ન સાયકૈઃ ॥ ૩॥

શિખરિણી

અનાઘ્રાતં પુષ્પં; કિસલયમલૂનં કરરુહૈ-
રનાવિદ્ધં રત્નં મધુ નવમનાસ્વાદિતરસમ્ ॥

અખણ્ડં પુણ્યાનાં ફલમિવ ચ તદ્રૂપમનઘં
ન જાને ભોક્તારં કમિહ સમુપસ્થાસ્યતિ વિધિઃ ॥ ૪॥

શિખરિણી

સ્મિતં કિઞ્ચિદ્ વક્ત્રે સરલતરલો દૃષ્ટિવિભવઃ

પરિસ્પન્દો વાચામભિનવવિલાસોક્તિસરસઃ ॥

ગતાનામારમ્ભઃ કિસલયિતલીલાપરિકરઃ
સ્પૃશન્ત્યાસ્તારુણ્યં કિમિહ ન હિ રમ્યં મૃગદૃશઃ? ॥ ૫॥

શાર્દૂલવિક્રીડિત

વ્યાદીર્ઘેણ ચલેન વક્રગતિના તેજસ્વિના ભોગિના
નીલાબ્જદ્યુતિનાઽહિના વરમહં દષ્ટો, ન તચ્ચક્ષુષા ॥

દષ્ટે સન્તિ ચિકિત્સકા દિશિ-દિશિ પ્રાયેણ ધર્માર્થિનો
મુગ્ધાક્ષીક્ષણવીક્ષિતસ્ય ન હિ મે વૈદ્યો ન ચાપ્યૌષધમ્ ॥ ૬॥

વંશસ્થ

સ્મિતેન ભાવેન ચ લજ્જયા ભિયા
પરાઙ્મુખૈરર્ધકટાક્ષવીક્ષણૈઃ ॥

વચોભિરીર્ષ્યાકલહેન લીલયા
સમસ્તભાવૈઃ ખલુ બન્ધનં સ્ત્રિયઃ ॥ ૭॥

શાલિની

ભ્રૂચાતુર્યાકુઞ્ચિતાક્ષાઃ કટાક્ષાઃ
સ્નિગ્ધા વાચો લજ્જિતાશ્ચૈવ હાસાઃ ॥

લીલામન્દં પ્રસ્થિતં ચ સ્થિતં ચ
સ્ત્રીણામેતદ્ ભૂષણં ચાયુધં ચ ॥ ૮॥

શાર્દૂલવિક્રીડિત

વક્ત્રં ચન્દ્રવિડમ્બિ પઙ્કજપરીહાસક્ષમે લોચને
વર્ણઃ સ્વર્ણમપાકરિષ્ણુરલિનીજિષ્ણુઃ કચાનાં ચયઃ ॥

વક્ષોજાવિભકુમ્ભવિભ્રમહરૌ ગુર્વી નિતમ્બસ્થલી
વાચાં હારિ ચ માર્દવં યુવતિષુ સ્વાભાવિકં મણ્ડનમ્ ॥ ૯॥

શાર્દૂલવિક્રીડિત

દ્રષ્ટવ્યેષુ કિમુત્તમં મૃગદૃશઃ પ્રેમપ્રસન્નં મુખં
ઘ્રાતવ્યેષ્વપિ કિં? તદાસ્યપવનઃ, શ્રવ્યેષુ કિં? તદ્વચઃ ॥

કિં સ્વાદ્યેષુ? તદોષ્ઠપલ્લવરસઃ; સ્પૃશ્યેષુ કિં ? તદ્વપુઃ

ધ્યેયં કિં? નવયૌવનં સહૃદયૈઃ સર્વત્ર તદ્વિભ્રમાઃ ॥ ૧૦॥

વસન્તતિલકા

એતાશ્ચલદ્વલયસંહતિમેખલોત્થ
ઝંકારનૂપુરપરાજિતરાજહંસ્યઃ ॥

કુર્વન્તિ કસ્ય ન મનો વિવશં તરુણ્યો
વિત્રસ્તમુગ્ધહરિણીસદૃશૈઃ કટાક્ષૈઃ ॥ ૧૧॥

દોધક

કુઙ્કુમપઙ્કકલઙ્કિતદેહા ગૌરપયોધરકમ્પિતહારા ।
નૂપુરહંસરણત્પદપદ્મા કં ન વશીકુરુતે ભુવિ રામા ? ॥ ૧૨॥

વસન્તતિલકા

નૂનં હિ તે કવિવરા વિપરીતબોધા
યે નિત્યમાહુરબલા ઇતિ કામિનીસ્તાઃ ॥

યાભિર્વિલોલતરતારકદૃષ્ટિપાતૈઃ
શક્રાદયોऽપિ વિજિતાસ્ત્વબલાઃ કથં તાઃ ? ॥ ૧૩॥

અનુષ્ટુભ્

નૂનમાજ્ઞાકરસ્તસ્યાઃ સુભ્રુવો મકરધ્વજઃ ।
યતસ્તન્નેત્રસઞ્ચારસૂચિતેષુ પ્રવર્તતે ॥ ૧૪॥

શાર્દૂલવિક્રીડિત

કેશાઃ સંયમિનઃ શ્રુતેરપિ પરં પારં ગતે લોચને
અન્તર્વક્ત્રમપિ સ્વભાવશુચિભિઃ કીર્ણં દ્વિજાનાં ગણૈઃ ॥

મુક્તાનાં સતતાધિવાસરુચિરૌ વક્ષોજકુમ્ભાવિમા
વિત્થં તન્વિ! વપુઃ પ્રશાન્તમપિ તે ક્ષોભં કરોત્યેવ નઃ ॥ ૧૫॥

અનુષ્ટુભ્

સતિ પ્રદીપે સત્યગ્નૌ સત્સુ નાનામણિષ્વપિ ।
વિના મે મૃગશાવાક્ષ્યા તમોભૂતમિદં જગત્ ॥ ૧૬॥

શાર્દૂલવિક્રીડિત

ઉદ્વૃત્તઃ સ્તનભાર એષ તરલે નેત્રે ચલે ભ્રૂલતે
રાગાધિષ્ઠિતમોષ્ઠપલ્લવમિદં કુર્વન્તુ નામ વ્યથામ્ ॥

સૌભાગ્યાક્ષરમાલિકેવ લિખિતા પુષ્પાયુધેન સ્વયં
મધ્યસ્થાઽપિ કરોતિ તાપમધિકં રોમાવલી કેન સા ? ॥ ૧૭॥

અનુષ્ટુભ્

મુખેન ચન્દ્રકાન્તેન મહાનીલૈઃ શિરોરુહૈઃ ।
પાણિભ્યાં પદ્મરાગાભ્યાં રેજે રત્નમયીવ સા ॥ ૧૮॥

અનુષ્ટુભ્

ગુરુણા સ્તનભારેણ મુખચન્દ્રેણ ભાસ્વતા ।
શનૈશ્ચરાભ્યાં પાદાભ્યાં રેજે ગ્રહમયીવ સા ॥ ૧૯॥

વસંતતિલકા

તસ્યાઃ સ્તનૌ યદિ ઘનૌ, જઘનં ચ હારિ
વક્ત્રં ચ ચારુ તવ ચિત્ત કિમાકુલત્વમ્ ॥

પુણ્યં કુરુષ્વ યદિ તેષુ તવાસ્તિ વાઞ્છા
પુણ્યૈર્વિના ન હિ ભવન્તિ સમીહિતાર્થાઃ ॥ ૨૦॥

વસન્તતિલકા

સમ્મોહયન્તિ મદયન્તિ વિડમ્બયન્તિ
નિર્ભર્ત્સયન્તિ રમયન્તિ વિષાદયન્તિ ॥

એતાઃ પ્રવિશ્ય સદયં હૃદયં નરાણાં
કિં નામ વામનયના ન સમાચરન્તિ ॥ ૨૧॥

રત્થોદ્ધતા

તાવદેવ કૃતિનાં હૃદિ સ્ફુરત્યેષ નિર્મલવિવેકદીપકઃ ।
યાવદેવ ન કુરઙ્ગચક્ષુષાં તાડ્યતે ચટુલલોચનાઞ્ચલૈઃ ॥ ૨૨॥

માલિની

વચસિ ભવતિ સઙ્ગત્યાગમુદ્દિશ્ય વાર્તા
શ્રુતિમુખમુખરાણાં કેવલં પણ્ડિતાનામ્ ॥

જઘનમરુણરત્નગ્રન્થિકાઞ્ચીકલાપં

કુવલયનયનાનાં કો વિહાતું સમર્થઃ ? ॥ ૨૩॥

આર્યા

સ્વપરપ્રતારકોઽસૌ નિન્દતિ યોઽલીકપણ્ડિતો યુવતિમ્ ।
યસ્માત્તપસોઽપિ ફલં સ્વર્ગસ્તસ્યાપિ ફલં તથાપ્સરસઃ ॥ ૨૪॥

અનુષ્ટુભ્

અજિતાત્મસુ સમ્બદ્ધઃ સમાધિકૃતચાપલઃ ।
ભુજઙ્ગકુટિલઃ સ્તબ્ધો ભ્રૂવિક્ષેપઃ ખલાયતે ॥ ૨૫॥

સ્રગ્ધરા

સન્માર્ગે તાવદાસ્તે પ્રભવતિ ચ નરસ્તાવદેવીન્દ્રિયાણાં
લજ્જાં તાવદ્વિધત્તે વિનયમપિ સમાલમ્બતે તાવદેવ ॥

ભ્રૂચાપાકૃષ્ટમુક્તાઃ શ્રવણપથગતા નીલપક્ષ્માણ એતે
યાવલ્લીલાવતીનાં હૃદિ ન ધૃતિમુષો દૃષ્ટિબાણાઃ પતન્તિ ॥ ૨૬॥

શાર્દૂલવિક્રીડિત

વિશ્વામિત્રપરાશરપ્રભૃતયો વાતામ્બુપર્ણાશનાઃ
તેઽપિ સ્ત્રીમુખપઙ્કજં સુલલિતં દૃષ્ટ્વૈવ મોહં ગતાઃ ॥

શાલ્યન્નં સઘૃતં પયોદધિયુતં યે ભુઞ્જતે માનવાઃ
તેષામિન્દ્રિયનિગ્રહો યદિ ભવેદ્વિન્ધ્યસ્તરેત્સાગરમ્ ॥ ૨૭॥

ઉપજાતિ

સુધામયોઽપિ ક્ષયરોગશાન્ત્યૈ નાસાગ્રમુક્તાફલકચ્છલેન ॥

અનઙ્ગસંજીવનદૃષ્ટશક્તિર્મુખામૃતં તે પિબતીવ ચન્દ્રઃ ॥ ૨૮॥

શિખરિણી

અસારાઃ સન્ત્વેતે વિરસવિરસાશ્ચૈવ વિષયા
જુગુપ્સન્તાં યદ્વા નનુ સકલદોષાસ્પદમિતિ ॥

તથાપ્યન્તસ્તત્ત્વે પ્રણિહિતધિયામપ્યનબલઃ
તદીયો નાખ્યેયઃ સ્ફુરતિ હૃદયે કોઽપિ મહિમા ॥ ૨૯॥

વસંતતિલકા

વિસ્તારિતં મકરકેતનધીવરેણ
સ્ત્રીસંજ્ઞિતં બડિશમત્ર ભવામ્બુરાશૌ ॥

યેનાચિરાત્તદધરામિષલોલમર્ત્ય-
મત્સ્યાદ્વિકૃષ્ય સ પચત્યનુરાગવહ્નૌ ॥ ૩૦ ॥

અનુષ્ટુભ્

કામિનીકાયકાન્તારે સ્તનપર્વતદુર્ગમે ।
મા સઞ્ચર મનઃપાન્થ ! તત્રાસ્તે સ્મરતસ્કરઃ ॥ ૩૧ ॥

શિખરિણી

ન ગમ્યો મન્ત્રાણાં ન ચ ભવતિ ભૈષજ્યવિષયો
ન ચાપિ પ્રધ્વંસં વ્રજતિ વિવિધૈઃ શાન્તિકશતૈઃ ॥

ભ્રમાવેશાદઙ્ગે કમપિ વિદધદ્ભઙ્ગમસકૃત્
સ્મરાપસ્મારોઽયં ભ્રમયતિ દૃશં ઘૂર્ણયતિ ચ ॥ ૩૨ ॥

અનુષ્ટુભ્

તાવન્મહત્ત્વં પાણ્ડિત્યં કુલીનત્વં વિવેકિતા ।
યાવજ્જ્વલતિ નાઙ્ગેષુ હન્ત પઞ્ચેષુપાવકઃ ॥ ૩૩ ॥

શાર્દૂલવિક્રીડિત

સ્ત્રીમુદ્રાં ઝષકેતનસ્ય પરમાં સર્વાર્થસમ્પત્કરીં
યે મૂઢાઃ પ્રવિહાય યાન્તિ કુધિયો મિથ્યાફલાન્વેષિણઃ ॥

તે તેનૈવ નિહત્ય નિર્દયતરં નગ્નીકૃતા મુણ્ડિતાઃ
કેચિત્પઞ્ચશિખીકૃતાશ્ચ જટિલાઃ કાપાલિકાશ્ચાપરે ॥ ૩૪ ॥

શિખરિણી

કૃશઃ કાણઃ ખઞ્જઃ શ્રવણરહિતઃ પુચ્છવિકલો
વ્રણી પૂયક્લિન્નઃ કૃમિકુલશતૈરાવૃતતનુઃ ॥

ક્ષુધાક્ષામો જીર્ણઃ પિઠરકકપાલાર્પિતગલઃ
શુનીમન્વેતિ શ્વા ! હતમપિ ચ હન્ત્યેવ મદનઃ ॥ ૩૫ ॥

વસંતતિલકા

મત્તેભકુમ્ભદલને ભુવિ સન્તિ શૂરાઃ

કેચિત્પ્રચણ્ડમૃગરાજવધેઽપિ દક્ષાઃ ॥

કિન્તુ બ્રવીમિ બલિનાં પુરતઃ પ્રસહ્ય
કંદર્પદર્પદલને વિરલા મનુષ્યાઃ ॥ ૩૬॥

હરિણી

પરિમલભૃતો વાતાઃ શાખા નવાઙ્કુરકોટયો
મધુરવિરુતોત્કણ્ઠા વાચઃ પ્રિયાઃ પિકપક્ષિણામ્ ॥

વિરલસુરતસ્વેદોદ્ગારા વધૂવદનેન્દવઃ
પ્રસરતિ મધૌ રાત્ર્યાં જાતો ન કસ્ય ગુણોદયઃ ? ॥ ૩૭॥

દ્રુતવિલમ્બિત

મધુરયં મધુરૈરપિ કોકિલા
કલરવૈર્મલયસ્ય ચ વાયુભિઃ ॥

વિરહિણઃ પ્રહિણસ્તિ શરીરિણો
વિપદિ હન્ત સુધાઽપિ વિષાયતે ॥ ૩૮॥

શાર્દૂલવિક્રીડિત

આવાસઃ કિલકિઞ્ચિતસ્ય દયિતાઃ પાર્શ્વે વિલાસાલસાઃ
કર્ણે કોકિલકામિનીકલરવઃ સ્મેરો લતામણ્ડપઃ ॥

ગોષ્ઠી સત્કવિભિઃ સમં કતિપયૈઃ સેવ્યાઃ સિતાંશો કરાઃ
કેષાઞ્ચિત્સુખયન્તિ ધન્યહૃદયં ચૈત્રે વિચિત્રાઃ ક્ષપાઃ ॥ ૩૯॥

શાર્દૂલવિક્રીડિત

પાન્થસ્ત્રીવિરહાગ્નિતીવ્રતરતામાતન્વતી મઞ્જરી
માકન્દેષુ પિકાઙ્ગનાભિરધુના સોત્કણ્ઠમાલોક્યતે ॥

અપ્યેતે નવપાટલીપરિમલપ્રાગ્ભારપાટચ્ચરા
વાન્તિ ક્લાન્તિવિતાનતાનવકૃતઃ શ્રીખણ્ડશૈલાનિલાઃ ॥૪૦॥

આર્યા

પ્રિયપુરતો યુવતીનાં તાવત્પદમાતનોતિ હૃદિ માનઃ ।
ભવતિ ન યાવચ્ચન્દનતરુસુરભિર્નિર્મલઃ પવનઃ ॥ ૪૧॥

આર્યા

સહકારકુસુમકેસરનિકરભરામોદમૂર્ચ્છિતદિગન્તે ।
મધુરમધુવિધુરમધુપે મધૌ ભવેત્કસ્ય નોત્કણ્ઠા ॥ ૪૨॥

વસન્તતિલકા

અચ્છાચ્છચન્દનરસાર્દ્રકરા મૃગાક્ષ્યો
ધારાગૃહાણિ કુસુમાનિ ચ કૌમુદી ચ ॥

મન્દો મરુત્સુમનસઃ શુચિ હર્મ્યપૃષ્ઠં
ગ્રીષ્મે મદં ચ મદનં ચ વિવર્ધયન્તિ ॥ ૪૩॥

શિખરિણી

સ્રજો હૃદ્યામોદા વ્યજનપવનશ્ચન્દ્રકિરણાઃ
પરાગઃ કાસારો મલયજરસઃ સીધુ વિશદમ્ ॥

શુચિઃ સૌધોત્સઙ્ગઃ પ્રતનુ વસનં પઙ્કજદૃશો
નિદાધાર્તા હ્યેતત્સુખમુપલભન્તે સુકૃતિનઃ ॥ ૪૪॥

દોધક

તરુણીવૈષોહીપિતકામા વિકસિતજાતીપુષ્પસુગન્ધિઃ ।
ઉન્નતપીનપયોધરભારા પ્રાવૃટ્ કુરુતે કસ્ય ન હર્ષમ્ ? ॥ ૪૫॥

માલિની

વિયદુપચિતમેઘં ભૂમયઃ કન્દલિન્યો
નવકુટજકદમ્બામોદિનો ગન્ધવાહાઃ ॥

શિખિકુલકલકેકારાવરમ્યા વનાન્તાઃ
સુખિનમસુખિનં વા સર્વમુત્કણ્ઠયન્તિ ॥ ૪૬॥

આર્યા

ઉપરિ ઘનં ઘનપટલં તિર્યગ્ગિરયોઽપિ નર્તિતમયૂરાઃ ।
ક્ષિતિરપિ કન્દલધવલા દૃષ્ટિં પથિકઃ ક્વ યાપયતુ ? ॥ ૪૭॥

શિખરિણી

ઇતો વિદ્યુદ્વલ્લીવિલસિતમિતઃ કેતકિતરોઃ
સ્ફુરદ્ગન્ધઃ પ્રોદ્યજ્જલદનિનદસ્ફૂર્જિતમિતઃ ॥

ઇતઃ કેકીક્રિડાકલકલરવઃ પક્ષ્મલદૃશાં
કથં યાસ્યન્ત્યેતે વિરહદિવસાઃ સમ્ભૃતરસાઃ ? ॥ ૪૮॥

શિખરિણી

અસૂચીસંચારે તમસિ નભસિ પ્રૌઢજલદ
ધ્વનિપ્રાયે તસ્મિન્ પતતિ દૃશદાં નીરનિચયે ॥

ઇદં સૌદામિન્યાઃ કનકકમનીયં વિલસિતં
મુદં ચ ગ્લાનિં ચ પ્રથયતિ પથિષ્વેવ સુદૃશામ્ ॥ ૪૯॥

શાર્દૂલવિક્રીડિત

આસારેષુ ન હર્મ્યતઃ પ્રિતતમૈર્યાતું યદા શક્યતે
શીતોત્કમ્પનિમિત્તમાયતદૃશા ગાઢં સમાલિઙ્ગ્યતે ॥

જાતાઃ શીકરશીતલાશ્ચ મરુતશ્ચાત્યન્તખેદચ્છિદો
ધન્યાનાં બત દુર્દિનં સુદિનતાં યાતિ પ્રિયાસઙ્ગમે ॥ ૫૦॥

સ્રગ્ધરા

અર્ધં નીત્વા નિશાયાઃ સરભસસુરતાયાસખિન્નશ્લથાઙ્ગઃ
પ્રોદ્ભૂતાસહ્યતૃષ્ણો મધુમદનિરતો હર્મ્યપૃષ્ઠે વિવિક્તે ॥

સમ્ભોગાક્લાન્તકાન્તાશિથિલભુજલતાઽઽવર્જિતં કર્કરીતો
જ્યોત્સ્નાભિન્નાચ્છધારં ન પિબતિ સલિલં શારદં મંદભાગ્યઃ ॥ ૫૧॥

શાર્દૂલવિક્રીડિત

હેમન્તે દધિદુગ્ધસર્પિરશના માઞ્જિષ્ઠવાસોભૃતઃ
કાશ્મીરદ્રવસાન્દ્રદિગ્ધવપુષઃ ખિન્ના વિચિત્રૈ રતૈઃ ॥

પીનોરુસ્તનકામિનીજનકૃતાશ્લેષા ગૃહ્યાભ્યન્તરે
તામ્બૂલીદલપૂગપૂરિતમુખા ધન્યાઃ સુખં શેરતે ॥ ૫૨॥

સ્રગ્ધરા

પ્રોદ્યત્પ્રૌઢપ્રિયઙ્ગુદ્યુતિભૃતિ વિદલત્કુન્દમાદ્યદ્વિરેફે
કાલે પ્રાલેયવાતપ્રચલવિકસિતોદ્દામમન્દારદામ્નિ ॥

યેષાં નો કણ્ઠલગ્ના ક્ષણમપિ તુહિનક્ષોદદક્ષા મૃગાક્ષી
તેષામાયામયામા યમસદનસમા યામિની યાતિ યૂનામ્ ॥ ૫૩॥

સ્રગ્ધરા

ચુમ્બન્તો ગણ્ડભિત્તીરલકવતિ મુખે સીત્કૃતાન્યાદધાના
વક્ષઃસૂત્કઞ્ચુકેષુ સ્તનભરપુલકોદ્ભેદમાપાદયન્તઃ ॥

ઊરૂનાકમ્પયન્તઃ પૃથુજઘનતટાત્સ્રંસયન્તોંઽશુકાનિ
વ્યક્તં કાન્તાજનાનાં વિટચરિતકૃતઃ શૈશિરા વાન્તિ વાતાઃ ॥ ૫૪॥

શાર્દૂલવિક્રીડિત

કેશાનાકુલયન્ દૃશો મુકુલયન્ વાસો બલાદાક્ષિપન્
આતન્વન્ પુલકોદ્ગમં પ્રકટયન્નાવેગકમ્પં ગતૈઃ ॥

વારંવારમુદારસીત્કૃતકૃતો દન્તચ્છદાન્પીડયન્
પ્રાયઃ શૈશિર એષ સમ્પ્રતિ મરુત્કાન્તાસુ કાન્તાયતે ॥ ૫૫॥

ઉપજાતિ

વિશ્રમ્ય વિશ્રમ્ય વનદ્રુમાણાં છાયાસુ તન્વી વિચચાર કાચિત્ ।
સ્તનોત્તરીયેણ કરોદ્ધૃતેન નિવારયન્તી શશિનો મયૂખાન્ ॥ ૫૬॥

હરિણી

પ્રણયમધુરાઃ પ્રેમોદ્ગાઢા રસાદલસાસ્તતો
ભણિતિમધુરા મુગ્ધપ્રાયાઃ પ્રકાશિતસમ્મદાઃ ॥

પ્રકૃતિસુભગા વિશ્રમ્ભાર્હાઃ સ્મરોદયદાયિનો
રહસિ કિમપિ સ્વૈરાલાપા હરન્તિ મૃગીદૃશામ્ ॥ ૫૭॥

ઉપજાતિ

અદર્શને દર્શનમાત્રકામા
દૃષ્ટ્વા પરિષ્વઙ્ગસુખૈકલોલાઃ ॥

આલિઙ્ગિતાયાં પુનરાયતાક્ષ્યાં
આશાસ્મહે વિગ્રહયોરભેદમ્ ॥ ૫૮॥

રથોદ્ધતા

માલતી શિરસિ જૃમ્ભણોન્મુખી
ચન્દનં વપુષિ કુઙ્કુમાન્વિતમ્ ॥

વક્ષસિ પ્રિયતમા મનોહરા

સ્વર્ગ એવ પરિશિષ્ટ આગતઃ ॥ ૫૯॥

શાર્દૂલવિક્રીડિત

પ્રાઙ્મામેતિ મનાગનાગતરસં જાતાભિલાષાં તતઃ
સવ્રીડં તદનુ શ્લથીકૃતતનુ પ્રધ્વસ્તધૈર્યં પુનઃ ॥

પ્રેમાર્દ્રં સ્પૃહણીયનિર્ભરરહઃક્રીડાપ્રગલ્ભં તતો
નિઃશઙ્કાઙ્ગવિકર્ષણાધિકસુખં રમ્યં કુલસ્ત્રીરતમ્ ॥ ૬૦॥

માલિની

ઉરસિ નિપતિતાનાં સ્રસ્તધમ્મિલ્લકાનાં
મુકુલિતનયનાનાં કિઞ્ચિદુન્મીલિતાનામ્ ॥

ઉપરિસુરતખેદસ્વિન્નગણ્ડસ્થલીનાં
અધરમધુ વધૂનાં ભાગ્યવન્તઃ પિબન્તિ ॥ ૬૧॥

અનુષ્ટુભ્

ઉન્મત્તપ્રેમસંરમ્ભાદારભન્તે યદઙ્ગનાઃ ॥

તત્ર પ્રત્યૂહમાધાતું બ્રહ્માઽપિ ખલુ કાતરઃ ॥ ૬૨॥

આર્યા

આમીલિતનયનાનાં યત્સુરતરસોઽનુ સંવિદં ભાતિ ।
મિથુનૈર્મિથોઽવધારિતમવિતથમિદમેવ કામનિર્વહણમ્ ॥ ૬૩॥

વસંતતિલકા

મત્તેભકુમ્ભપરિણાહિનિ કુઙ્કુમાર્દ્રે
કાન્તાપયોધરતટે રસખેદખિન્નઃ ॥

વક્ષો નિધાય ભુજપઞ્જરમધ્યવર્તી
ધન્યઃ ક્ષપાં ક્ષપયતિ ક્ષણલબ્ધનિદ્રઃ ॥ ૬૪॥

અનુષ્ટુભ્

એતત્કામફલં લોકે યદ્દ્વયોરેકચિત્તતા ।
અન્યચિત્તકૃતે કામે શવયોરેવ સઙ્ગમઃ ॥ ૬૫॥

શાલિની

એકો દેવઃ કેશવો વા શિવો વા હ્યેકં મિત્રં ભૂપતિર્વા યતિર્વા ।
એકો વાસઃ પત્તને વા વને વા હ્યેકા ભાર્યા સુંદરી વા દરી વા ॥ ૬૫-અ ॥

ઉપજાતિ

માત્સર્યમુત્સાર્ય વિચાર્ય કાર્યમાર્યાઃ સમર્યાદમિદં વદન્તુ ॥

સેવ્યા નિતમ્બાઃ કિમુ ભૂધરણામુત સ્મરસ્મેરવિલાસિનીનામ્ ॥ ૬૬ ॥

અનુષ્ટુભ્

આવાસઃ ક્રિયતાં ગાઙ્ગે પાપવારિણિ વારિણિ ।
સ્તનમધ્યે તરુણ્યા વા મનોહારિણિ હારિણિ ॥ ૬૭ ॥

માલિની

દિશઃ વનહરિણીભ્યઃ સ્નિગ્ધવંશચ્છવીનાં
કવલમુપલકોટિચ્છિન્નમૂલં કુશાનામ્ ॥

શુકયુવતિકપોલાપાણ્ડુ તામ્બૂલવલ્લી-
દલમરુણનખાગ્રૈઃ પાટિતં વા વધૂભ્યઃ ॥ ૬૯ ॥

સ્રગ્ધરા

સંસારેઽસ્મિન્નસારે પરિણતિતરલે દ્વે ગતી પણ્ડિતાનાં
તત્ત્વજ્ઞાનામૃતામ્ભઃપ્લવલુલિતધિયાં યાતુ કાલઃ કથઞ્ચિત્ ॥

નોચેન્મુગ્ધાઙ્ગનાનાં સ્તનજઘનભરાભોગસમ્ભોગિનીનાં
સ્થૂલોપસ્થસ્થલીષુ સ્થગિતકરતલસ્પર્શલોલોદ્યતાનામ્ ॥ ૭૦ ॥

શિખરિણી

ભવન્તો વેદાન્તપ્રણિહિતધિયામાપ્તગુરવો
વિશિત્રાલાપાનાં વયમપિ કવીનામનુચરાઃ ॥

તથાપ્યેતદ્ બ્રૂમો ન હિ પરહિતાત્પુણ્યમધિકં
ન ચાસ્મિન્સંસારે કુવલયદૃશો રમ્યમપરમ્ ॥ ૭૧ ॥

માલિની

કિમિહ બહુભિરુક્તૈર્યુક્તિશૂન્યૈઃ પ્રલાપૈઃ
દ્વયમિહ પુરુષાણાં સર્વદા સેવનીયમ્ ॥

અભિનવમદલીલાલાલસં સુંદરીણાં
સ્તનભરપરિખિન્નં યૌવનં વ વનં વા ॥ ૭૨॥

સ્રગ્ધરા

રાગસ્યાગારમેકં નરકશતમહાદુઃખસમ્પ્રાપ્તિહેતુઃ
મોહસ્યોત્પત્તિબીજં જલધરપટલં જ્ઞાનતારાધિપસ્ય ॥

કન્દર્પસ્યૈકમિત્રં પ્રકટિતવિવિધસ્પષ્ટદોષપ્રબન્ધં
લોકેઽસ્મિન્ન હ્યનર્થવ્રજકુલભવનં યૌવનાદન્યદસ્તિ ॥ ૭૩॥

શાર્દૂલવિક્રીડિત

શૃંગારદ્રુમનીરદે પ્રસૃમરક્રીડારસ સ્રોતસિ
પ્રદ્યુમ્નપ્રિયબાન્ધવે ચતુરતામુક્તાફલોદન્વતિ ॥

તન્વીનેત્રચકોરપાર્વણવિધૌ સૌભાગ્યલક્ષ્મીનિધૌ
ધન્યઃ કોઽપિ ન વિક્રિયાં કલયતિ પ્રાપ્તે નવે યૌવને ॥ ૭૪॥

સ્રગ્ધરા

રાજંસ્તૃષ્ણામ્બુરાશેર્ન હિ જગતિ ગતઃ કશ્ચિદેવાવસાનં
કો વાર્થોઽર્થૈ પ્રભૂતૈઃ સ્વવપુષિ ગલિતે યૌવને સાનુરાગે ॥

ગચ્છામઃ સદ્મ તાવદ્વિકસિતકુમુદેન્દીવરાલોકિનીનાં
યાવચ્ચાક્રમ્ય રૂપં ઝટિનિ ન જરયા લુપ્યતે પ્રેયસીનામ્ ॥ ૭૫॥

શાર્દૂલવિક્રીડિત

જાન્ત્યન્ધાય ચ દુર્મુખાય ચ જરાજીર્ણાખિલાઙ્ગાય ચ
ગ્રામીણાય ચ દુષ્કુલાય ચ ગલત્કુષ્ઠાભિભૂતાય ચ ॥

યચ્છન્તીષુ મનોહરં નિજવપુર્લક્ષ્મીલવાકાङ્ક્ષયા
પણ્યસ્ત્રીષુ વિવેકકલ્પલતિકાશસ્ત્રીષુ રજ્યેત કઃ ? ॥ ૭૬॥

અનુષ્ટુભ્

વેશ્યાઽસૌ મદનજ્વાલા રૂપેન્ધનવિવર્ધિતા ।
કામિભિર્યત્ર હૂયન્તે યૌવનાનિ ધનાનિ ચ ॥ ૭૭॥

આર્યા

કશ્ચુમ્બતિ કુલપુરુષો વેશ્યાધરપલ્લવં મનોજ્ઞમપિ ।

ચારભટચૌરચેટકનટવિટનિષ્ઠીવનશરાવમ્ ? ॥ ૭૮

સ્રગ્ધરા

સંસારેऽસ્મિન્નસારે કુનૃપતિભવનદ્વારસેવાવલમ્બ
વ્યાસઙ્ગધ્વસ્તધૈર્યં કથમમલધિયો માનસં સંવિદધ્યુઃ ? ॥

યદ્યેતાઃ પ્રોદ્યદિન્દુદ્યુતિનિ વયભૃતો ન સ્યુરમ્ભોજનેત્રાઃ
પ્રેઙ્ખત્કાઞ્ચીકલાપાઃ સ્તનભરવિનમન્મધ્યભાજસ્તરુણ્યઃ ? ॥ ૭૯॥

શાર્દૂલવિક્રીડિત

સિદ્ધાધ્યાસિતકન્દરે હરવૃષસ્કન્ધાવરુગ્ણદ્રુમે
ગઙ્ગાધૌતશિલાતલે હિમવતઃ સ્થાને સ્થિતે શ્રેયસિ ॥

કઃ કુર્વીત શિરઃ પ્રમાણમલિનં મ્લાનં મનસ્વી જનો
યદ્વિત્રસ્તરકુરઙ્ગશાવનયના ન સ્યુઃ સ્મરાસ્ત્રં સ્ત્રિયઃ ॥ ૮૦॥

અનુષ્ટુભ્

સંસારોદધિનિસ્તાર પદવી ન દવીયસી ।
અન્તરા દુસ્તરા ન સ્યુર્યદિ રે મદિરેક્ષણા ॥ ૮૧॥

ઇંદ્રવજ્રા

સત્યં જના વચ્મિ ન પક્ષપાતાલ્લોકેષુ સપ્તસ્વપિ તથ્યમેતત્ ।
નાન્યન્મનોહારિ નિતમ્બિનીભ્યો દુઃખૈકહેતુર્ન ચ કશ્ચિદન્યઃ ॥ ૮૨॥

શાર્દૂલવિક્રીડિત

કાન્તેત્યુત્પલલોચનેતિ વિપુલશ્રોણીભરેત્યુત્સુકઃ
પીનોત્તુઙ્ગપયોધરેતિ સુમુખામ્ભોજેતિ સુભ્રૂરિતિ ॥

દૃષ્ટ્વા માદ્યતિ મોદતેऽભિરમતે પ્રસ્તૌતિ વિદ્વાનપિ
પ્રત્યક્ષાશુચિભસ્ત્રિકાં સ્ત્રિયમહો મોહસ્ય દુશ્ચેષ્ટિતમ્ ! ॥ ૮૩॥

અનુષ્ટુભ્

સ્મૃતા ભવતિ તાપાય દૃષ્ટ્વા ચોન્માદવર્ધિની ।
સ્પૃષ્ટા ભવતિ મોહાય ! સા નામ દયિતા કથમ્ ? ॥ ૮૪॥

અનુષ્ટુભ્

તાવદેવામૃતમયી યાવલ્લોચનગોચરા ।
ચક્ષુઃપથાદતીતા તુ વિષાદપ્યતિરિચ્યતે ॥ ૮૫॥

અનુષ્ટુભ્

નામૃતં ન વિષં કિઞ્ચિદેકાં મુક્ત્વા નિતમ્બિનીમ્ ।
સૈવામૃતરુતા રક્તા વિરક્તા વિષવલ્લરી ॥ ૮૬॥

સ્રગ્ધરા

આવર્તઃ સંશયાનામવિનયભવનં પત્તનં સાહસાનાં
દોષાણાં સંવિધાનં કપટશતમયં ક્ષેત્રમપ્રત્યયાનામ્ ॥

સ્વર્ગદ્વારસ્ય વિઘ્નૌ નરકપુરમુખં સર્વમાયાકરણ્ડં
સ્ત્રીયન્ત્રં કેન સૃષ્ટં વિષમમૃતમયં પ્રાણિલોકસ્ય પાશઃ ॥ ૮૭॥

શાર્દૂલવિક્રીડિત

નો સત્યેન મૃગાઙ્કુ એષ વદનીભૂતો ન ચેન્દીવર-
દ્વન્દ્વં લોચનતાં ગતં ન કનકૈરપ્યઙ્ગયષ્ટિઃ કૃતા ॥

કિં ત્વેવં કવિભિઃ પ્રતારિતમનાસ્તત્ત્વં વિજાનન્નપિ
ત્વઙ્માંસાસ્થિમયં વપુર્મૃગદૃશાં મન્દો જનઃ સેવતે ॥ ૮૮॥

ઉપજાતિ

લીલાવતીનાં સહજા વિલાસાસ્ત એવ મૂઢસ્ય હૃદિ સ્ફુરન્તિ ॥

રાગો નલિન્યા હિ નિસર્ગસિદ્ધસ્તત્ર ભ્રમત્યેવ વૃથા ષડઙ્ઘ્રિઃ ॥ ૮૯॥

શિખરિણી

યદેતત્પૂર્ણેન્દુદ્યુતિહરમુદારાકૃતિવરં
મુખાબ્જં તન્વઙ્ગ્યાઃ કિલ વસતિ તત્રાધરમધુ ॥

ઇદં તત્કિમ્પાકદ્રુમફલમિવાતીવ વિરસં
વ્યતીતેઽસ્મિન્ કાલે વિષમિવ ભવિષ્યત્યસુખદમ્ ॥ ૯૦॥

શાર્દૂલવિક્રીડિત

અગ્રાહ્યં હૃદયં યથૈવ વદનં યદ્દર્પણાન્તર્ગતં
ભાવઃ પર્વતસૂક્ષ્મમાર્ગવિષમઃ સ્ત્રીણાં ન વિજ્ઞાયતે ॥

ચિત્તં પુષ્કરપત્રતોયતરલં વિદ્વદ્ભિરાશંસિતં
નારી નામ વિષાઙ્કુરૈરિવ લતા દોષૈઃ સમં વર્ધિતા ॥ ૯૧॥

અનુષ્ટુભ્

જલ્પન્તિ સાર્ધમન્યેન પશ્યન્ત્યન્યં સવિભ્રમમ્ ।
હૃદ્ગતં ચિન્તયન્ત્યન્યં પ્રિયઃ કો નામ યોષિતામ્ ? ॥ ૯૨॥

વૈતાલીય

મધુ તિષ્ઠતિ વાચિ યોષિતાં હૃદિ હાલાહલમેવ કેવલમ્ ।
અત એવ નિપીયતેઽધરો હૃદયં મુષ્ટિભિરેવ તાડ્યતે ॥ ૯૩॥

માલિની

ઇહ હિ મધુરગીતં નૃત્યમેતદ્રસોઽયં
સ્ફુરતિ પરિમલોઽસૌ સ્પર્શ એષ સ્તનાનામ્ ।
ઇતિ હતપરમાર્થૈરિન્દ્રિયૈર્ભ્રામ્યમાણઃ
સ્વહિતકરણદક્ષૈઃ પઞ્ચભિર્વઞ્ચિતોઽસિ ॥ ૯૪॥

મન્દાક્રાન્તા

શાસ્ત્રજ્ઞોઽપિ પ્રથિતવિનયોઽપ્યાત્મબોધોઽપિ બાઢં
સંસારેઽસ્મિન્ભવતિ વિરલો ભાજનં સદ્ગતીનામ્ ॥

યેનૈતસ્મિન્નિરયનગરદ્વારમુદ્ઘાટયન્તી
વામાક્ષીણાં ભવતિ કુટિલા ભ્રૂલતા કુઞ્ચિકેવ ॥ ૯૫॥

શાર્દૂલવિક્રીડિત

ઉન્મીલત્ત્રિવલિતરઙ્ગનિલયા પ્રોત્તુઙ્ગપીનસ્તન-
દ્વન્દ્વેનોદ્યતચક્રવાકમિથુના વક્ત્રામ્બુજોદ્ભાસિની ॥

કાન્તાકારધરા નદીયમભિતઃ ક્રૂરાશયા નેષ્યતે
સંસારાર્ણવમજ્જનં યદિ તદા દૂરેણ સન્ત્યજ્યતામ્ ॥ ૯૬॥

હરિણી

અપસર સખે દૂરાદસ્માત્કટાક્ષવિષાનલાત્
પ્રકૃતિકુટિલાદ્યોષિત્સર્પાદ્વિલાસફણાભૃતઃ ॥

ઇતરફણિના દષ્ટઃ શક્યશ્ચિકિત્સિતુમૌષધે-

શ્ચતુરવનિતાભોગિગ્રસ્તં ત્યજન્તિ હિ મન્ત્રિણઃ ॥ ૯૭॥

પુષ્પિતાગ્રા

ઇદમનુચિતમક્રમશ્ચ પુંસાં
યદિહ જરાસ્વપિ માન્મથા વિકારાઃ ।
યદપિ ચ ન કૃતં નિતમ્બિનીનાં
સ્તનપતનાવધિ જીવિતં રતં વા ॥ ૯૮॥

વસન્તતિલકા

ધન્યાસ્ત એવ તરલાયતલોચનાનાં
તારુણ્યદર્પઘનપીનપયોધરાણામ્ ॥

ક્ષામોદરોપરિલસત્ત્રિવલીલતાનાં
દૃષ્ટ્વાऽऽકૃતિં વિકૃતિમેતિ મનો ન યેષામ્ ॥ ૯૯॥

આર્યા

વિરહોऽપિ સઙ્ગમઃ ખલુ પરસ્પરં સઙ્ગતં મનો યેષામ્ ।
હૃદયમપિ વિઘટ્ટિતં ચેત્સઙ્ગો વિરહં વિશેષયતિ ॥ ૧૦૦॥

રથોદ્ધતા

કિં ગતેન યદિ સા ન જીવતિ
પ્રાણિતિ પ્રિયતમા તથાऽપિ કિમ્ ॥

ઇત્યુદીર્ય નવમેઘદર્શને
ન પ્રયાતિ પથિકઃ સ્વમન્દિરમ્ ॥ ૧૦૧॥

હરિણી

વિરમત બુધા યોષિત્સઙ્ગાત્ સુખાત્ક્ષણભઙ્ગુરાત્
કુરુત કરુણામૈત્રીપ્રજ્ઞાવધૂજનસઙ્ગમમ્ ॥

ન ખલુ નરકે હારાક્રાન્તં ઘનસ્તનમણ્ડલં
શરણમથવા શ્રોણીબિમ્બં રણન્મણિમેખલમ્ ॥ ૧૦૨॥

શિખરિણી

યદા યોગાભ્યાસવ્યસનવશયોરાત્મમનસો-
રવિચ્છિન્ના મૈત્રી સ્ફુરતિ યમિનસ્તસ્ય કિમુ તૈઃ ॥

પ્રિયાણામાલાપૈરધરમધુભિર્વક્ત્રવિધુભિઃ
સનિઃશ્વાસામોદૈઃ સકુચકલશાશ્લેષસુરતૈઃ ? ॥ ૧૦૩॥

શિખરિણી

સુધાશુભ્રં ધામ સ્ફુરદમલરશ્મિઃ શશધરઃ
પ્રિયાવક્ત્રામ્ભોજં મલયજરસશ્ચાતિસુરભિઃ ॥

સ્રજો હૃદ્યામોદાસ્તદિદમખિલં રાગિણિ જને
કરોત્યન્તઃક્ષોભં ન તુ વિષયસંસર્ગવિમુખે ॥ ૧૦૪॥

મંદાક્રાન્તા

બાલે લીલામુકુલિતમમી સુંદરા દૃષ્ટિપાતાઃ
કિં ક્ષિપ્યન્તે વિરમ વિરમ વ્યર્થ એષ શ્રમસ્તે ॥

સમ્પ્રત્યન્ત્યે વયસિ વિરતં બાલ્યમાસ્થા વનાન્તે
ક્ષીણો મોહસ્તૃણમિવ જગજ્જાલમાલોકયામઃ ॥ ૧૦૫॥

શિખરિણી

ઇયં બાલા માં પ્રત્યનવરતમિન્દીવરદલ-
પ્રભાચોરં ચક્ષુઃ ક્ષિપતિ કિમભિપ્રેતમનયા ? ॥

ગતો મોહોઽસ્માકં સ્મરશબરબાણવ્યતિકર-
જ્વલજ્જ્વાલાઃ શાંતાસ્તદપિ ન વરાકી વિરમતિ ॥ ૧૦૬॥

શાર્દૂલવિક્રીડિત

કિં કન્દર્પ ! શરં કદર્થયસિ રે કોદણ્ડઝઙ્કારિતૈ ?
રે રે કોકિલ કોમલં કલરવં કિં વા વૃથા જલ્પસિ ॥

મુગ્ધે ! સ્નિગ્ધવિદગ્ધમુગ્ધમધુરૈર્લોલૈઃ કટાક્ષૈરલં
ચેતઃ સમ્પ્રતિ ચંદ્રચૂડચરણધ્યાનામૃતે વર્તતે ॥૧૦૭॥

શિખરિણી

યદાઽઽસીદજ્ઞાનં સ્મરતિમિરસઞ્ચારજનિતં
તદા સર્વં નારીમયમિદમશેષં જગદભૂત્ ।
ઇદાનીમસ્માકં પટુતરવિવેકાઞ્જનદૃશાં
સમીભૂતા દૃષ્ટિસ્ત્રિભુવનમપિ બ્રહ્મ મનુતે ॥ ૧૦૮॥

ભર્તૃહરિકૃત શતકત્રયી

Bhartrihari's three hundred-verse sets

Pages 125-214

Editted and translated in 1969 by L. G. Vinjhe.

(Translation not included here.)

Copyright

Nirnayasagar Publisher

નિર્ણયસાગર પ્રકાશન, મુમ્બઈ ૪૦૦૦૦૨

26-28 Dr. M. B. Velkar Street Mumbai 400002

---

*Shringarashatak by Bhartrihari*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*